# taittirIya upanishad (with Vedic accents)

# તૈત્તિરીયોપનિષત્ સસ્વરા

## Document Information

Text title : taittirIya svarA.nkita

File name : taitaccent.itx

Category : upanishhat, svara

Location : doc_upanishhat

Transliterated by : Avinash Sathaye sohum at ms.uky.edu, Kartik kartik at Eng.Auburn.EDU

Proofread by : Avinash Sathaye, Kartik, John Manetta, NA

Description-comments : Mantrapushpam, 7/108; Krishna YajurVeda, Mukhya upanishad, with Vedic accents

Latest update : May 1, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# તૈત્તિરીયોપનિષત્ સસ્વરા

## પ્રથમા શીક્ષાવલ્લી

ૐ શ્રી ગુરુભ્યો નમઃ । હરિઃ ૐ ।

ૐ શં નો મિત્રઃ શં વરુણઃ । શં નો ભવત્વર્યમા ।
શં ન ઇન્દ્રો બૃહસ્પતિઃ । શં નો વિષ્ણુરુરુક્રમઃ ।
નમો બ્રહ્મણે । નમસ્તે વાયો । ત્વમેવ પ્રત્યક્ષં બ્રહ્માસિ ।
ત્વામેવ પ્રત્યક્ષં બ્રહ્મ વદિષ્યામિ । ઋતં વદિષ્યામિ ।
સત્યં વદિષ્યામિ । તન્મામવતુ । તદ્વક્તારમવતુ ।
અવતુ મામ્ । અવતુ વક્તારમ્ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ ૧॥
ઇતિ પ્રથમોઽનુવાકઃ ॥

ૐ શીક્ષાં વ્યાખ્યાસ્યામઃ । વર્ણઃ સ્વરઃ । માત્રા બલમ્ ।
સામ સન્તાનઃ । ઇત્યુક્તઃ શીક્ષાધ્યાયઃ ॥ ૧॥

ઇતિ દ્વિતીયોઽનુવાકઃ ॥

સહ નૌ યશઃ । સહ નૌ બ્રહ્મવર્ચસમ્ ।
અથાતઃ સꣳહિતાયા ઉપનિષદમ્ વ્યાખ્યાસ્યામઃ ।
પઞ્ચસ્વધિકરણેષુ ।
અધિલોકમધિજ્યૌતિષમધિવિદ્યમધિપ્રજમધ્યાત્મમ્ ।
તા મહાસꣳહિતા ઇત્યાચક્ષતે । અથાધિલોકમ્ ।
પૃથિવી પૂર્વરૂપમ્ । દ્યૌરુત્તરરૂપમ્ ।

આકાશઃ સન્ધિઃ ॥ ૧॥

વાયુઃ સન્ધાનમ્ । ઇત્યધિલોકમ્ । અથાધિજ્યૌતિષમ્ ।
અગ્નિઃ પૂર્વરૂપમ્ । આદિત્ય ઉત્તરરૂપમ્ । આપઃ સન્ધિઃ ।
વૈદ્યુતઃ સન્ધાનમ્ । ઇત્યધિજ્યૌતિષમ્ । અથાધિવિદ્યમ્ ।
આચાર્યઃ પૂર્વરૂપમ્ ॥ ૨॥

અન્તેવાસ્યુત્તરરૂપમ્ । વિદ્યા સન્ધિઃ ।
પ્રવચનꣳ સન્ધાનમ્ ।
ઇત્યધિવિદ્યમ્ । અથાધિપ્રજમ્ । માતા પૂર્વરૂપમ્ ।
પિતોત્તરરૂપમ્ । પ્રજા સન્ધિઃ । પ્રજનનꣳ સન્ધાનમ્ ।
ઇત્યધિપ્રજમ્ ॥ ૩॥

અથાધ્યાત્મમ્ । અધરાહનુઃ પૂર્વરૂપમ્ ।
ઉત્તરાહનૂત્તરરૂપમ્ । વાક્સન્ધિઃ । જિહ્વાસન્ધાનમ્ ।
ઇત્યધ્યાત્મમ્ । ઇતીમામહાસꣳહિતાઃ ।
ય એવમેતા મહાસꣳહિતા વ્યાખ્યાતા વેદ ।
સન્ધીયતે પ્રજયા પશુભિઃ ।
બ્રહ્મવર્ચસેનાન્નાદ્યેન સુવર્ગ્યેણ લોકેન ॥ ૪॥

ઇતિ તૃતીયોઽનુવાકઃ ॥

યશ્છન્દસામૃષભો વિશ્વરૂપઃ ।
છન્દોભ્યોઽધ્યમૃતાત્સમ્બભૂવ ।
સ મેન્દ્રો મેધયા સ્પૃણોતુ ।
અમૃતસ્ય દેવ ધારણો ભૂયાસમ્ ।
શરીરં મે વિચર્ષણમ્ । જિહ્વા મે મધુમત્તમા ।
કર્ણાભ્યાં ભૂરિવિશ્રુવમ્ ।
બ્રહ્મણઃ કોશોઽસિ મેધયા પિહિતઃ ।
શ્રુતં મે ગોપાય । આવહન્તી વિતન્વાના ॥ ૧॥

કુર્વાણાઽચીરમાત્મનઃ । વાસાꣳસિ મમ ગાવશ્ચ ।
અન્નપાને ચ સર્વદા । તતો મે શ્રિયમાવહ ।

લોમશાં પશુભિઃ સહ સ્વાહા ।
આમાયન્તુ બ્રહ્મચારિણઃ સ્વાહા ।
વિમાઽઽયન્તુ બ્રહ્મચારિણઃ સ્વાહા ।
પ્રમાઽઽયન્તુ બ્રહ્મચારિણઃ સ્વાહા ।
દમાયન્તુ બ્રહ્મચારિણઃ સ્વાહા ।
શમાયન્તુ બ્રહ્મચારિણઃ સ્વાહા ॥ ૨॥

યશો જનેઽસાનિ સ્વાહા । શ્રેયાન્ વસ્યસોઽસાનિ સ્વાહા ।
તં ત્વા ભગ પ્રવિશાનિ સ્વાહા ।
સ મા ભગ પ્રવિશ સ્વાહા ।
તસ્મિન્ સહસ્રશાખે । નિભગાઽહં ત્વયિ મૃજે સ્વાહા ।
યથાઽઽપઃ પ્રવતાઽઽયન્તિ । યથા માસા અહર્જરમ્ ।
એવં માં બ્રહ્મચારિણઃ । ધાતરાયન્તુ સર્વતઃ સ્વાહા ।
પ્રતિવેશોઽસિ પ્રમાભાહિ પ્રમાપદ્યસ્વ ॥ ૩॥

ઇતિ ચતુર્થોઽનુવાકઃ ॥

ભૂર્ભુવઃ સુવરિતિ વા એતાસ્તિસ્રો વ્યાહૃતયઃ ।
તાસામુહસ્મૈ તાં ચતુર્થીમ્ । માહાચમસ્યઃ પ્રવેદયતે ।
મહ ઇતિ । તદ્બ્રહ્મ । સ આત્મા । અઙ્ગાન્યન્યા દેવતાઃ ।
ભૂરિતિ વા અયં લોકઃ । ભુવ ઇત્યન્તરિક્ષમ્ ।
સુવરિત્યસૌ લોકઃ ॥ ૧॥

મહ ઇત્યાદિત્યઃ । આદિત્યેન વાવ સર્વેલોક મહીયન્તે ।
ભૂરિતિ વા અગ્નિઃ । ભુવ ઇતિ વાયુઃ । સુવરિત્યાદિત્યઃ ।
મહ ઇતિ ચન્દ્રમાઃ । ચન્દ્રમસા વાવ
સર્વાણિ જ્યોતીँષિ મહીયન્તે । ભૂરિતિ વા ઋચઃ ।
ભુવ ઇતિ સામાનિ ।
સુવરિતિ યજૂँષિ ॥ ૨॥

મહ ઇતિ બ્રહ્મ । બ્રહ્મણા વાવ સર્વેવેદા મહીયન્તે ।
ભૂરિતિ વૈ પ્રાણઃ । ભુવ ઇત્યપાનઃ । સુવરિતિ વ્યાનઃ ।

મહ ઇત્યન્નમ્ । અન્નેન વાવ સર્વે પ્રાણ મહીયન્તે ।
તા વા એતાશ્ચતસ્રશ્ચતુર્ધા । ચતસ્રશ્ચતસ્રો વ્યાહૃતયઃ ।
તા યો વેદ ।
સ વેદ બ્રહ્મ । સર્વેઽસ્મૈદેવા બલિમાવહન્તિ ॥ ૩॥

ઇતિ પઞ્ચમોઽનુવાકઃ ॥

સ ય એષોઽન્તહૃદય આકાશઃ ।
તસ્મિન્નયં પુરુષો મનોમયઃ । અમૃતો હિરણ્મયઃ ।
અન્તરેણ તાલુકે । ય એષસ્તન ઇવાવલમ્બતે । સેન્દ્રયોનિઃ ।
યત્રાસૌ કેશાન્તો વિવર્તતે । વ્યપોહ્ય શીર્ષકપાલે ।
ભૂરિત્યગ્નૌ પ્રતિતિષ્ઠતિ । ભુવ ઇતિ વાયૌ ॥ ૧॥

સુવરિત્યાદિત્યે । મહ ઇતિ બ્રહ્મણિ । આપ્નોતિ સ્વારાજ્યમ્ ।
આપ્નોતિ મનસસ્પતિમ્ । વાક્પતિશ્ચક્ષુષ્પતિઃ ।
શ્રોત્રપતિર્વિજ્ઞાનપતિઃ । એતત્તતો ભવતિ ।
આકાશશરીરં બ્રહ્મ ।
સત્યાત્મ પ્રાણારામં મન આનન્દમ્ ।
શાન્તિસમૃદ્ધમમૃતમ્ ।
ઇતિ પ્રાચીન યોગ્યોપાસ્વ ॥ ૨॥
ઇતિ ષષ્ઠોઽનુવાકઃ ॥

પૃથિવ્યન્તરિક્ષં દ્યૌર્દિશોઽવાન્તરદિશાઃ ।
અગ્નિર્વાયુરાદિત્યશ્ચન્દ્રમા નક્ષત્રાણિ ।
આપ ઓષધયો વનસ્પતય આકાશ આત્મા । ઇત્યધિભૂતમ્ ।
અથાધ્યાત્મમ્ । પ્રાણો વ્યાનોઽપાન ઉદાનઃ સમાનઃ ।
ચક્ષુઃ શ્રોત્રં મનો વાક્ ત્વક્ ।
ચર્મમા ઁ સ સ્નાવાસ્થિ મજ્જા ।
એતદધિવિધાય ઋષિરવોચત્ ।
પાઙ્ક્તં વા ઇદ ઁ સર્વમ્ ।
પાઙ્ક્તેનૈવ પાઙ્ક્તગ્ સ્પૃણોતીતિ ॥ ૧॥

ઇતિ સપ્તમોઽનુવાકઃ ॥

ઓમિતિ બ્રહ્મ । ઓમિતીદꣳ સર્વમ્ ।

ઓમિત્યેતદનુકૃતિર્હસ્મ વા અપ્યોશ્રાવયેત્યાશ્રાવયન્તિ ।

ઓમિતિ સામાનિ ગાયન્તિ । ઓꣳ શોમિતિ શસ્ત્રાણિ શꣳ સન્તિ ।

ઓમિત્યધ્વર્યુઃ પ્રતિગરં પ્રતિગૃણાતિ ।

ઓમિતિ બ્રહ્મા પ્રસૌતિ । ઓમિત્યગ્નિહોત્રમનુજાનાતિ ।

ઓમિતિ બ્રાહ્મણઃ પ્રવક્ષ્યન્નાહ બ્રહ્મોપાપ્નવાનીતિ ।

બ્રહ્મૈવોપાપ્નોતિ ॥ ૧॥

ઇત્યષ્ટમોઽનુવાકઃ ॥

ઋતં ચ સ્વાધ્યાયપ્રવચને ચ ।

સત્યં ચ સ્વાધ્યાયપ્રવચને ચ ।

તપશ્ચ સ્વાધ્યાયપ્રવચને ચ ।

દમશ્ચ સ્વાધ્યાયપ્રવચને ચ ।

શમશ્ચ સ્વાધ્યાયપ્રવચને ચ ।

અગ્નયશ્ચ સ્વાધ્યાયપ્રવચને ચ ।

અગ્નિહોત્રં ચ સ્વાધ્યાયપ્રવચને ચ ।

અતિથયશ્ચ સ્વાધ્યાયપ્રવચને ચ ।

માનુષં ચ સ્વાધ્યાયપ્રવચને ચ ।

પ્રજા ચ સ્વાધ્યાયપ્રવચને ચ ।

પ્રજનશ્ચ સ્વાધ્યાયપ્રવચને ચ ।

પ્રજાતિશ્ચ સ્વાધ્યાયપ્રવચને ચ ।

સત્યમિતિ સત્યવચા રાથી તરઃ ।

તપ ઇતિ તપોનિત્યઃ પૌરુશિષ્ટિઃ ।

સ્વાધ્યાયપ્રવચને એવેતિ નાકો મૌદ્ગલ્યઃ ।

તદ્ધિ તપસ્તદ્ધિ તપઃ ॥ ૧॥

ઇતિ નવમોઽનુવાકઃ ॥

અહં વૃક્ષસ્ય રેરિવા । કીર્તિઃ પૃષ્ઠં ગિરેરિવ ।

ઊર્ધ્વપવિત્રો વાજિનીવ સ્વમૃતમસ્મિ ।
દ્રવિણꣳ સવર્ચસમ્ । સુમેધ અમૃતોક્ષિતઃ ।
ઇતિ ત્રિશઙ્કોર્વેદાનુવચનમ્ ॥ ૧॥

ઇતિ દશમોઽનુવાકઃ ॥

વેદમનૂચ્યાચાર્યોન્તેવાસિનમનુશાસ્તિ ।
સત્યં વદ । ધર્મં ચર । સ્વાધ્યાયાન્મા પ્રમદઃ ।
આચાર્યાય પ્રિયં ધનમાહૃત્ય પ્રજાતન્તું મા વ્યવચ્છેત્સીઃ ।
સત્યાન્ન પ્રમદિતવ્યમ્ । ધર્માન્ન પ્રમદિતવ્યમ્ ।
કુશલાન્ન પ્રમદિતવ્યમ્ । ભૂત્યૈ ન પ્રમદિતવ્યમ્ ।
સ્વાધ્યાયપ્રવચનાભ્યાં ન પ્રમદિતવ્યમ્ ॥ ૧॥

દેવપિતૃકાર્યાભ્યાં ન પ્રમદિતવ્યમ્ । માતૃદેવો ભવ ।
પિતૃદેવો ભવ । આચાર્યદેવો ભવ । અતિથિદેવો ભવ ।
યાન્યનવદ્યાનિ કર્માણિ । તાનિ સેવિતવ્યાનિ । નો ઇતરાણિ ।
યાન્યસ્માકꣳ સુચરિતાનિ । તાનિ ત્વયોપાસ્યાનિ ॥ ૨॥

નો ઇતરાણિ । યે કે ચાસ્મચ્છ્રેયાꣳ સો બ્રાહ્મણાઃ ।
તેષાં ત્વયાઽઽસનેન પ્રશ્વસિતવ્યમ્ । શ્રદ્ધયા દેયમ્ ।
અશ્રદ્ધયાઽદેયમ્ । શ્રિયા દેયમ્ । હ્રિયા દેયમ્ ।
ભિયા દેયમ્ । સંવિદા દેયમ્ ।
અથ યદિ તે કર્મવિચિકિત્સા વા વૃત્તવિચિકિત્સા વા સ્યાત્ ॥ ૩॥

યે તત્ર બ્રાહ્મણાઃ સંમર્શિનઃ । યુક્તા આયુક્તાઃ ।
અલૂક્ષા ધર્મકામાઃ સ્યુઃ । યથા તે તત્ર વર્તેરન્ ।
તથા તત્ર વર્તેથાઃ । અથાભ્યાખ્યાતેષુ ।
યે તત્ર બ્રાહ્મણાઃ સંમર્શિનઃ । યુક્તા આયુક્તાઃ ।
અલૂક્ષા ધર્મકામાઃ સ્યુઃ । યથા તે તેષુ વર્તેરન્ ।
તથા તેષુ વર્તેથાઃ । એષ આદેશઃ । એષ ઉપદેશઃ ।
એષા વેદોપનિષત્ । એતદનુશાસનમ્ । એવમુપાસિતવ્યમ્ ।
એવમુ ચૈતદુપાસ્યમ્ ॥ ૪॥

ઇત્યેકાદશઽનુવાકઃ ॥

શં નો મિત્રઃ શં વરુણઃ । શં નો ભવત્વર્યમા ।
શં ન ઇન્દ્રો બૃહસ્પતિઃ । શં નો વિષ્ણુરુરુક્રમઃ ।
નમો બ્રહ્મણે । નમસ્તે વાયો । ત્વમેવ પ્રત્યક્ષં બ્રહ્માસિ ।
ત્વામેવ પ્રત્યક્ષં બ્રહ્માવાદિષમ્ । ઋતમવાદિષમ્ ।
સત્યમવાદિષમ્ । તન્મામાવીત્ । તદ્વક્તારમાવીત્ ।
આવીન્મામ્ । આવીદ્વક્તારમ્ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ ૧॥

ઇતિ દ્વાદશોઽનુવાકઃ ॥

॥ ઇતિ શીક્ષાવલ્લી સમાપ્તા ॥

## દ્વિતીયા બ્રહ્માનન્દવલ્લી

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ બ્રહ્મવિદાપ્નોતિ પરમ્ । તદેષાઽભ્યુક્તા ।
સત્યં જ્ઞાનમનન્તં બ્રહ્મ ।
યો વેદ નિહિતં ગુહાયાં પરમે વ્યોમન્ ।
સોઽશ્નુતે સર્વાન્ કામાન્સહ । બ્રહ્મણા વિપશ્ચિતેતિ ॥

તસ્માદ્વા એતસ્માદાત્મન આકાશઃ સમ્ભૂતઃ । આકાશાદ્વાયુઃ ।
વાયોરગ્નિઃ । અગ્નેરાપઃ । અદ્ભ્યઃ પૃથિવી ।
પૃથિવ્યા ઓષધયઃ । ઓષધીભ્યોન્નમ્ । અન્નાત્પુરુષઃ ।
સ વા એષ પુરુષોઽન્નરસમયઃ । તસ્યેદમેવ શિરઃ ।
અયં દક્ષિણઃ પક્ષઃ । અયમુત્તરઃ પક્ષઃ ।
અયમાત્મા । ઇદં પુચ્છં પ્રતિષ્ઠા ।

તદપ્યેષ શ્લોકો ભવતિ ॥ ૧॥

ઇતિ પ્રથમોઽનુવાકઃ ॥

અન્નાદ્વૈ પ્રજાઃ પ્રજાયન્તે । યાઃ કાશ્ચ પૃથિવીꣳ શ્રિતાઃ ।
અથો અન્નેનૈવ જીવન્તિ । અથૈનદપિ યન્ત્યન્તતઃ ।
અન્નꣳ હિ ભૂતાનાં જ્યેષ્ઠમ્ । તસ્માત્ સર્વૌષધમુચ્યતે ।
સર્વં વૈ તેઽન્નમાપ્નુવન્તિ । યેઽન્નં બ્રહ્મોપાસતે ।
અન્નꣳ હિ ભૂતાનાં જ્યેષ્ઠમ્ । તસ્માત્ સર્વૌષધમુચ્યતે ।
અન્નાદ્ ભૂતાનિ જાયન્તે । જાતાન્યન્નેન વર્ધન્તે ।
અદ્યતેઽત્તિ ચ ભૂતાનિ । તસ્માદન્નં તદુચ્યત ઇતિ ।
તસ્માદ્વા એતસ્માદન્નરસમયાત્ । અન્યોઽન્તર આત્મા પ્રાણમયઃ ।
તેનૈષ પૂર્ણઃ । સ વા એષ પુરુષવિધ એવ ।
તસ્ય પુરુષવિધતામ્ । અન્વયં પુરુષવિધઃ ।
તસ્ય પ્રાણ એવ શિરઃ । વ્યાનો દક્ષિણઃ પક્ષઃ ।
અપાન ઉત્તરઃ પક્ષઃ । આકાશ આત્મા ।
પૃથિવી પુચ્છં પ્રતિષ્ઠા । તદપ્યેષ શ્લોકો ભવતિ ॥ ૧॥

ઇતિ દ્વિતીયોઽનુવાકઃ ॥

પ્રાણં દેવા અનુ પ્રાણન્તિ । મનુષ્યાઃ પશવશ્ચ યે ।
પ્રાણો હિ ભૂતાનામાયુઃ । તસ્માત્ સર્વાયુષમુચ્યતે ।
સર્વમેવ ત આયુર્યન્તિ । યે પ્રાણં બ્રહ્મોપાસતે ।
પ્રાણો હિ ભૂતાનામાયુઃ । તસ્માત્ સર્વાયુષમુચ્યત ઇતિ ।
તસ્યૈષ એવ શારીર આત્મા । યઃ પૂર્વસ્ય ।
તસ્માદ્વા એતસ્માત્ પ્રાણમયાત્ । અન્યોઽન્તર આત્મા મનોમયઃ ।
તેનૈષ પૂર્ણઃ । સ વા એષ પુરુષવિધ એવ ।
તસ્ય પુરુષવિધતામ્ । અન્વયં પુરુષવિધઃ ।
તસ્ય યજુરેવ શિરઃ । ઋગ્દક્ષિણઃ પક્ષઃ । સામોત્તરઃ પક્ષઃ ।
આદેશ આત્મા । અથર્વાઙ્ગિરસઃ પુચ્છં પ્રતિષ્ઠા ।
તદપ્યેષ શ્લોકો ભવતિ ॥ ૧॥

ઇતિ તૃતીયોઽનુવાકઃ ॥

યતો વાચો નિવર્તન્તે । અપ્રાપ્ય મનસા સહ ।
આનન્દં બ્રહ્મણો વિદ્વાન્ । ન બિભેતિ કદાચનેતિ ।
તસ્યૈષ એવ શારીર આત્મા । યઃ પૂર્વસ્ય ।
તસ્માદ્વા એતસ્માન્મનોમયાત્ । અન્યોઽન્તર આત્મા વિજ્ઞાનમયઃ ।
તેનૈષ પૂર્ણઃ । સ વા એષ પુરુષવિધ એવ ।
તસ્ય પુરુષવિધતામ્ ।
અન્વયં પુરુષવિધઃ । તસ્ય શ્રદ્ધૈવ શિરઃ ।
ઋતં દક્ષિણઃ પક્ષઃ ।
સત્યમુત્તરઃ પક્ષઃ । યોગ આત્મા । મહઃ પુચ્છં પ્રતિષ્ઠા ।
તદપ્યેષ શ્લોકો ભવતિ ॥ ૧॥

ઇતિ ચતુર્થોઽનુવાકઃ ॥

વિજ્ઞાનં યજ્ઞં તનુતે । કર્માણિ તનુતેઽપિ ચ ।
વિજ્ઞાનં દેવાઃ સર્વે ।
બ્રહ્મ જ્યેષ્ઠમુપાસતે । વિજ્ઞાનં બ્રહ્મ ચેદ્વેદ ।
તસ્માચ્ચેન્ન પ્રમાદ્યતિ । શરીરે પાપ્મનો હિત્વા ।
સર્વાન્કામાન્ સમશ્નુત ઇતિ । તસ્યૈષ એવ શારીર આત્મા ।
યઃ પૂર્વસ્ય । તસ્માદ્વા એતસ્માદ્વિજ્ઞાનમયાત્ ।
અન્યોઽન્તર આત્માઽઽનન્દમયઃ । તેનૈષ પૂર્ણઃ ।
સ વા એષ પુરુષવિધ એવ । તસ્ય પુરુષવિધતામ્ ।
અન્વયં પુરુષવિધઃ । તસ્ય પ્રિયમેવ શિરઃ ।
મોદો દક્ષિણઃ પક્ષઃ ।
પ્રમોદ ઉત્તરઃ પક્ષઃ । આનન્દ આત્મા । બ્રહ્મ પુચ્છં પ્રતિષ્ઠા ।
તદપ્યેષ શ્લોકો ભવતિ ॥ ૧॥

ઇતિ પઞ્ચમોઽનુવાકઃ ॥

અસન્નેવ સ ભવતિ । અસદ્બ્રહ્મેતિ વેદ ચેત્ ।
અસ્તિ બ્રહ્મેતિ ચેદ્વેદ । સન્તમેનં તતો વિદુરિતિ ।

તસ્યૈષ એવ શારીર આત્મા । યઃ પૂર્વસ્ય ।
અથાતોઽનુપ્રશ્નાઃ । ઉતાવિદ્વાનમું લોકં પ્રેત્ય ।
કશ્ચન ગચ્છતીૅ3 3 for prolonging the vowel in the form । અઽઽ ।
આહો વિદ્વાનમું લોકં પ્રેત્ય । કશ્ચિત્સમશ્નુતાૅ3 ઉ ।
સોઽકામયત । બહુસ્યાં પ્રજાયેયેતિ । સ તપોઽતપ્યત ।
સ તપસ્તપ્ત્વા । ઇદꣳ સર્વમસૃજત । યદિદં કિઞ્ચ ।
તત્સૃષ્ટ્વા । તદેવાનુપ્રાવિશત્ । તદનુ પ્રવિશ્ય ।
સચ્ચ ત્યચ્ચાભવત્ ।
નિરુક્તં ચાનિરુક્તં ચ । નિલયનં ચાનિલયનં ચ ।
વિજ્ઞાનં ચાવિજ્ઞાનં ચ । સત્યં ચાનૃતં ચ સત્યમભવત્ ।
યદિદં કિઞ્ચ । તત્સત્યમિત્યાચક્ષતે ।
તદપ્યેષ શ્લોકો ભવતિ ॥ ૧॥

ઇતિ ષષ્ઠોઽનુવાકઃ ॥

અસદ્વા ઇદમગ્ર આસીત્ । તતો વૈ સદજાયત ।
તદાત્માન સ્વયમકુરુત । તસ્માત્તત્સુકૃતમુચ્યત ઇતિ ।
યદ્વૈ તત્ સુકૃતમ્ । રસો વૈ સઃ ।
રસꣳ હ્યેવાયં લબ્ધ્વાઽઽનન્દી ભવતિ । કો હ્યેવાન્યાત્કઃ
પ્રાણ્યાત્ । યદેષ આકાશ આનન્દો ન સ્યાત્ ।
એષ હ્યેવાઽઽનન્દયાતિ ।
યદા હ્યેવૈષ એતસ્મિન્નદૃશ્યેઽનાત્મ્યેઽનિરુક્તેઽનિલયનેઽભયં
પ્રતિષ્ઠાં વિન્દતે । અથ સોઽભયં ગતો ભવતિ ।
યદા હ્યેવૈષ એતસ્મિન્નુદરમન્તરં કુરુતે ।
અથ તસ્ય ભયં ભવતિ । તત્ત્વેવ ભયં વિદુષોઽમન્વાનસ્ય ।
તદપ્યેષ શ્લોકો ભવતિ ॥ ૧॥

ઇતિ સપ્તમોઽનુવાકઃ ॥

ભીષાઽસ્માદ્વાતઃ પવતે । ભીષોદેતિ સૂર્યઃ ।
ભીષાઽસ્માદગ્નિશ્ચેન્દ્રશ્ચ । મૃત્યુર્ધાવતિ પઞ્ચમ ઇતિ ।

સૈષાऽऽનન્દસ્ય મીમાँ સા ભવતિ ।

યુવા સ્યાત્સાધુયુવાऽધ્યાયકઃ ।

આશિષ્ઠો દૃઢિષ્ઠો બલિષ્ઠઃ ।

તસ્યેયં પૃથિવી સર્વા વિત્તસ્ય પૂર્ણા સ્યાત્ ।

સ એકો માનુષ આનન્દઃ । તે યે શતં માનુષા આનન્દાઃ ॥ ૧॥

સ એકો મનુષ્યગન્ધર્વાણામાનન્દઃ । શ્રોત્રિયસ્ય ચાકામહતસ્ય ।

તે યે શતં મનુષ્યગન્ધર્વાણામાનન્દાઃ ।

સ એકો દેવગન્ધર્વાણામાનન્દઃ । શ્રોત્રિયસ્ય ચાકામહતસ્ય ।

તે યે શતં દેવગન્ધર્વાણામાનન્દાઃ ।

સ એકઃ પિતૃણાં ચિરલોકલોકાનામાનન્દઃ ।

શ્રોત્રિયસ્ય ચાકામહતસ્ય ।

તે યે શતં પિતૃણાં ચિરલોકલોકાનામાનન્દાઃ ।

સ એક આજાનજાનાં દેવાનામાનન્દઃ ॥ ૨॥

શ્રોત્રિયસ્ય ચાકામહતસ્ય ।

તે યે શતં આજાનજાનાં દેવાનામાનન્દાઃ ।

સ એકઃ કર્મદેવાનાં દેવાનામાનન્દઃ ।

યે કર્મણા દેવાનપિયન્તિ । શ્રોત્રિયસ્ય ચાકામહતસ્ય ।

તે યે શતં કર્મદેવાનાં દેવાનામાનન્દાઃ ।

સ એકો દેવાનામાનન્દઃ । શ્રોત્રિયસ્ય ચાકામહતસ્ય ।

તે યે શતં દેવાનામાનન્દાઃ । સ એક ઇન્દ્રસ્યાऽऽનન્દઃ ॥ ૩॥

શ્રોત્રિયસ્ય ચાકામહતસ્ય । તે યે શતમિન્દ્રસ્યાऽऽનન્દાઃ ।

સ એકો બૃહસ્પતેરાનન્દઃ । શ્રોત્રિયસ્ય ચાકામહતસ્ય ।

તે યે શતં બૃહસ્પતેરાનન્દાઃ । સ એકઃ પ્રજાપતેરાનન્દઃ ।

શ્રોત્રિયસ્ય ચાકામહતસ્ય ।

તે યે શતં પ્રજાપતેરાનન્દાઃ ।

સ એકો બ્રહ્મણ આનન્દઃ । શ્રોત્રિયસ્ય ચાકામહતસ્ય ॥ ૪॥

સ યશ્ચાયં પુરુષે । યશ્ચાસાવાદિત્યે । સ એકઃ ।

સ ય એવંવિત્ । અસ્માલ્લોકાત્પ્રેત્ય ।
એતમન્નમયમાત્માનમુપસઙ્ક્રામતિ ।
એતં પ્રાણમયમાત્માનમુપસઙ્ક્રામતિ ।
એતં મનોમયમાત્માનમુપસઙ્ક્રામતિ ।
એતં વિજ્ઞાનમયમાત્માનમુપસઙ્ક્રામતિ ।
એતમાનન્દમયમાત્માનમુપસઙ્ક્રામતિ ।
તદપ્યેષ શ્લોકો ભવતિ ॥ ૫॥ ઇત્યષ્ટમોઽનુવાકઃ ॥

યતો વાચો નિવર્તન્તે । અપ્રાપ્ય મનસા સહ ।
આનન્દં બ્રહ્મણો વિદ્વાન્ ।
ન બિભેતિ કુતશ્ચનેતિ ।
એતꣳ હ વાવ ન તપતિ ।
કિમહꣳ સાધુ નાકરવમ્ । કિમહં પાપમકરવમિતિ ।
સ ય એવં વિદ્વાનેતે આત્માન સ્પૃણુતે ।
ઉભે હ્યેવૈષ એતે આત્માન સ્પૃણુતે । ય એવં વેદ ।
ઇત્યુપનિષત્ ॥ ૧॥

ઇતિ નવમોઽનુવાકઃ ॥

॥ ઇતિ બ્રહ્માનન્દવલ્લી સમાપ્તા ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## તૃતીયા ભૃગુવલ્લી

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ભૃગુર્વૈ વારુણિઃ । વરુણં પિતરમુપસસાર ।
અધીહિ ભગવો બ્રહ્મેતિ । તસ્મા એતત્પ્રોવાચ ।
અન્નં પ્રાણં ચક્ષુઃ શ્રોત્રં મનો વાચમિતિ ।
તꣳ હોવાચ । યતો વા ઇમાનિ ભૂતાનિ જાયન્તે ।
યેન જાતાનિ જીવન્તિ ।
યત્પ્રયન્ત્યભિસંવિશન્તિ । તદ્વિજિજ્ઞાસસ્વ । તદ્બ્રહ્મેતિ ।
સ તપોઽતપ્યત । સ તપસ્તપ્ત્વા ॥ ૧॥
ઇતિ પ્રથમોઽનુવાકઃ ॥

અન્નં બ્રહ્મેતિ વ્યજાનાત્ । અન્નાદ્ધ્યેવ ખલ્વિમાનિ
ભુતાનિ જાયન્તે । અન્નેન જાતાનિ જીવન્તિ ।
અન્નં પ્રયન્ત્યભિસંવિશન્તીતિ । તદ્વિજ્ઞાય ।
પુનરેવ વરુણં પિતરમુપસસાર ।
અધીહિ ભગવો બ્રહ્મેતિ । તꣳ હોવાચ ।
તપસા બ્રહ્મ વિજિજ્ઞાસસ્વ । તપો બ્રહ્મેતિ ।
સ તપોઽતપ્યત । સ તપસ્તપ્ત્વા ॥ ૧॥

ઇતિ દ્વિતીયોઽનુવાકઃ ॥

પ્રાણો બ્રહ્મેતિ વ્યજાનાત્ । પ્રાણાદ્ધ્યેવ ખલ્વિમાનિ
ભૂતાનિ જાયન્તે । પ્રાણેન જાતાનિ જીવન્તિ ।
પ્રાણં પ્રયન્ત્યભિસંવિશન્તીતિ । તદ્વિજ્ઞાય ।
પુનરેવ વરુણં પિતરમુપસસાર ।
અધીહિ ભગવો બ્રહ્મેતિ । તꣳ હોવાચ ।
તપસા બ્રહ્મ વિજિજ્ઞાસસ્વ । તપો બ્રહ્મેતિ ।
સ તપોઽતપ્યત । સ તપસ્તપ્ત્વા ॥ ૧॥

ઇતિ તૃતીયોઽનુવાકઃ ॥

મનો બ્રહ્મેતિ વ્યજાનાત્ । મનસો હ્યેવ ખલ્વિમાનિ
ભૂતાનિ જાયન્તે । મનસા જાતાનિ જીવન્તિ ।

મનઃ પ્રયન્ત્યભિસંવિશન્તીતિ । તદ્વિજ્ઞાય ।
પુનરેવ વરુણં પિતરમુપસસાર ।
અધીહિ ભગવો બ્રહ્મેતિ । તઁ હોવાચ ।
તપસા બ્રહ્મ વિજિજ્ઞાસસ્વ । તપો બ્રહ્મેતિ ।
સ તપોઽતપ્યત । સ તપસ્તપ્ત્વા ॥ ૧॥

ઇતિ ચતુર્થોઽનુવાકઃ ॥

વિજ્ઞાનં બ્રહ્મેતિ વ્યજાનાત્ । વિજ્ઞાનાદ્ધ્યેવ ખલ્વિમાનિ
ભૂતાનિ જાયન્તે । વિજ્ઞાનેન જાતાનિ જીવન્તિ ।
વિજ્ઞાનં પ્રયન્ત્યભિસંવિશન્તીતિ । તદ્વિજ્ઞાય ।
પુનરેવ વરુણં પિતરમુપસસાર ।
અધીહિ ભગવો બ્રહ્મેતિ । તઁ હોવાચ ।
તપસા બ્રહ્મ વિજિજ્ઞાસસ્વ । તપો બ્રહ્મેતિ ।
સ તપોઽતપ્યત । સ તપસ્તપ્ત્વા ॥ ૧॥

ઇતિ પઞ્ચમોઽનુવાકઃ ॥

આનન્દો બ્રહ્મેતિ વ્યજાનાત્ । આનન્દાધ્યેવ ખલ્વિમાનિ
ભૂતાનિ જાયન્તે । આનન્દેન જાતાનિ જીવન્તિ ।
આનન્દં પ્રયન્ત્યભિસંવિશન્તીતિ ।
સૈષા ભાર્ગવી વારુણી વિદ્યા । પરમે વ્યોમન્પ્રતિષ્ઠિતા ।
સ ય એવં વેદ પ્રતિતિષ્ઠતિ । અન્નવાનન્નાદો ભવતિ ।
મહાન્ભવતિ પ્રજયા પશુભિર્બ્રહ્મવર્ચસેન ।
મહાન્ કીર્ત્યા ॥ ૧॥
ઇતિ ષષ્ઠોઽનુવાકઃ ॥

અન્નં ન નિન્દ્યાત્ । તદ્વ્રતમ્ । પ્રાણો વા અન્નમ્ ।
શરીરમન્નાદમ્ । પ્રાણે શરીરં પ્રતિષ્ઠિતમ્ ।
શરીરે પ્રાણઃ પ્રતિષ્ઠિતઃ । તદેતદન્નમન્ને પ્રતિષ્ઠિતમ્ ।
સ ય એતદન્નમન્ને પ્રતિષ્ઠિતં વેદ પ્રતિતિષ્ઠતિ ।
અન્નવાનન્નાદો ભવતિ । મહાન્ભવતિ પ્રજયા

પશુભિર્બ્રહ્મવર્ચસેન । મહાન્ કીર્ત્યા ॥ ૧॥

ઇતિ સપ્તમોઽનુવાકઃ ॥

અન્નં ન પરિચક્ષીત । તદ્વ્રતમ્ । આપો વા અન્નમ્ ।
જ્યોતિરન્નાદમ્ । અપ્સુ જ્યોતિઃ પ્રતિષ્ઠિતમ્ ।
જ્યોતિષ્યાપઃ પ્રતિષ્ઠિતાઃ । તદેતદન્નમન્ને પ્રતિષ્ઠિતમ્ ।
સ ય એતદન્નમન્ને પ્રતિષ્ઠિતં વેદ પ્રતિતિષ્ઠતિ ।
અન્નવાનન્નાદો ભવતિ । મહાન્ભવતિ પ્રજયા
પશુભિર્બ્રહ્મવર્ચસેન । મહાન્ કીર્ત્યા ॥ ૧॥

ઇત્યષ્ટમોઽનુવાકઃ ॥

અન્નં બહુ કુર્વીત । તદ્વ્રતમ્ । પૃથિવી વા અન્નમ્ ।
આકાશોઽન્નાદઃ । પૃથિવ્યામાકાશઃ પ્રતિષ્ઠિતઃ ।
આકાશે પૃથિવી પ્રતિષ્ઠિતા ।
તદેતદન્નમન્ને પ્રતિષ્ઠિતમ્ ।
સ ય એતદન્નમન્ને પ્રતિષ્ઠિતં વેદ પ્રતિતિષ્ઠતિ ।
અન્નવાનન્નાદો ભવતિ । મહાન્ભવતિ પ્રજયા
પશુભિર્બ્રહ્મવર્ચસેન । મહાન્ કીર્ત્યા ॥ ૧॥

ઇતિ નવમોઽનુવાકઃ ॥

ન કઞ્ચન વસતૌ પ્રત્યાચક્ષીત । તદ્વ્રતમ્ ।
તસ્માદ્યયા કયા ચ વિધયા બહ્વન્નં પ્રાપ્નુયાત્ ।
અરાધ્યસ્મા અન્નમિત્યાચક્ષતે ।
એતદ્વૈ મુખતોઽન્નꣳ રાદ્ધમ્ ।
મુખતોઽસ્મા અન્નꣳ રાધ્યતે ।
એતદ્વૈ મધ્યતોઽન્નꣳ રાદ્ધમ્ ।
મધ્યતોઽસ્મા અન્નꣳ રાધ્યતે ।
એતદ્વા અન્તતોઽન્નꣳ રાદ્ધમ્ ।
અન્તતોઽસ્મા અન્નં રાધ્યતે ॥ ૧॥

ય એવં વેદ । ક્ષેમ ઇતિ વાચિ । યોગક્ષેમ
ઇતિ પ્રાણાપાનયોઃ ।
કર્મેતિ હસ્તયોઃ । ગતિરિતિ પાદયોઃ । વિમુક્તિરિતિ પાયૌ ।
ઇતિ માનુષીઃ સમાજ્ઞાઃ । અથ દૈવીઃ । તૃપ્તિરિતિ વૃષ્ટૌ ।
બલમિતિ વિદ્યુતિ ॥ ૨॥

યશ ઇતિ પશુષુ । જ્યોતિરિતિ નક્ષત્રેષુ ।
પ્રજાતિરમૃતમાનન્દ ઇત્યુપસ્થે । સર્વમિત્યાકાશે ।
તત્પ્રતિષ્ઠેત્યુપાસીત । પ્રતિષ્ઠાવાન્ ભવતિ ।
તન્મહ ઇત્યુપાસીત । મહાન્ભવતિ । તન્મન ઇત્યુપાસીત ।
માનવાન્ભવતિ ॥ ૩॥

તન્નમ ઇત્યુપાસીત । નમ્યન્તેઽસ્મૈ કામાઃ ।
તદ્બ્રહ્મેત્યુપાસીત । બ્રહ્મવાન્ભવતિ ।
તદ્બ્રહ્મણઃ પરિમર ઇત્યુપાસીત ।
પર્યેણં મ્રિયન્તે દ્વિષન્તઃ સપત્નાઃ ।
પરિ યેઽપ્રિયા ભ્રાતૃવ્યાઃ ।
સ યશ્ચાયં પુરુષે । યશ્ચાસાવાદિત્યે । સ એકઃ ॥ ૪॥

સ ય એવંવિત્ । અસ્માલ્લોકાત્પ્રેત્ય ।
એતમન્નમયમાત્માનમુપસઙ્ક્રમ્ય ।
એતં પ્રાણમયમાત્માનમુપસઙ્ક્રમ્ય ।
એતં મનોમયમાત્માનમુપસઙ્ક્રમ્ય ।
એતં વિજ્ઞાનમયમાત્માનમુપસઙ્ક્રમ્ય ।
એતમાનન્દમયમાત્માનમુપસઙ્ક્રમ્ય ।
ઇમાઁલ્લોકન્કામાન્ની કામરૂપ્યનુસઞ્ચરન્ ।
એતત્ સામ ગાયન્નાસ્તે । હા ૩ વુ હા ૩ વુ હા ૩ વુ ॥ ૫॥

અહમન્નમહમન્નમહમન્નમ્ ।
અહમન્નાદોऽ૩હમન્નાદોऽ૩અહમન્નાદઃ ।
અહꣳ શ્લોકકૃદહꣳ શ્લોકકૃદહꣳ શ્લોકકૃત્ ।

અહમસ્મિ પ્રથમજા ઋતા૩સ્ય ।
પૂર્વં દેવેભ્યોઽમૃતસ્ય ના૩ભાઇ ।
યો મા દદાતિ સ ઇદેવ મા૩અઽવાઃ ।
અહમન્નમન્નમદન્તમા૩દ્મિ ।
અહં વિશ્વં ભુવનમભ્યભવા૩મ્ ।
સુવર્ન જ્યોતીઃ । ય એવં વેદ । ઇત્યુપનિષત્ ॥ ૬॥

ઇતિ દશમોઽનુવાકઃ ॥

॥ ઇતિ ભૃગુવલ્લી સમાપ્તા ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિ નાવધીતમસ્તુ મા વિદ્વિષાવહૈ ।
॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ હરિઃ ૐ ॥

Encoded by Kartik, Avinash Sathaye sohum at ms.uky.edu
Proofread by Kartik, Avinash, NA

*taittirIya upanishad (with Vedic accents)*
pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*